International Journal of Applied Research 2018; 4(7): 401-403



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(7): 401-403
www.allresearchjournal.com
Received: 14-05-2018
Accepted: 16-08-2018

**डॉ. अशोक कुमार**
ग्राम + पत्रालय–फेंट, प्रखण्ड–
बासोपट्टी, जिला–मधुबनी, बिहार,
भारत

**Correspondence**
**डॉ. अशोक कुमार**
ग्राम + पत्रालय–फेंट, प्रखण्ड–
बासोपट्टी, जिला–मधुबनी, बिहार,
भारत

# संस्कृतवाङ्मये संस्कारशब्दार्थाः

**डॉ. अशोक कुमार**

**सारांशः –**

मनुष्यजीवने सर्वत्रोत्कर्षमाधातुं संस्काराः नितरामुपकुर्वत इति समाजशास्त्राभिज्ञानां दृढ़ामतिः। सर्वसमाजेषु किञ्चिच्जीवन लक्ष्ययाश्रित्य व्यवस्थापिताः संस्काराः। मनुष्यजीवनादन्यत्र चिह्नेषु मृत्यात्रादिष्वपि सौन्दर्यमाधातुं कृतेषु पिंडेषु अपि संस्कारशब्दः प्रथितः –

**कूट शब्दः** मनुष्यजीवने, संस्काराः, सौन्दर्यमाधातुं

**प्रस्तावना**

''यन्नेव भाजने लग्नः संस्कारो नान्यथा भवेत्'' ।

भारतीयसमाजे धर्मसूत्रकारैः स्मृतिकारैश्च निषेकादारभ्य मृत्योरनन्तरं पञ्चतत्त्वानि योग्यरीऽया पूर्वावस्थां नेतुं संस्काराणां नियतो विहितः। दृष्टादृष्टप्रयोजनानां संस्काराणामनुष्ठानं शास्त्रं विना न सम्भवतीति ते धर्मशास्त्रस्य विषयाः। जन्मनः पूर्वं बाल्यावस्थायां संस्काराणां भूयानुपयोग इति षोडश संस्कारेषुत्रयो जन्मनः पूर्वं दश च जातकर्मण उपनयनान्ता बालवस्थायामेव विधीयन्ते। इमे हि संस्कारा यथाकालं यथाविधिक्रियमाणाः फलिनोऽद्यापि दृश्यन्ते। अनेकवर्णजातिसम्प्रदायौ विभक्ते भारतीयसमाजे सहस्रेभ्यो वर्षेभ्यः प्रवृत्ताः संस्काराः कालक्रमाद् अनुष्ठाने संखमायां च क्षीयमाणाः दृश्यन्ते। अष्टाचत्वारिंशत्पर्यन्तं प्राप्ता संस्काराणां संख्या सम्प्रति षोडशसु समाविष्टा। तेषामपि न दृश्यतेऽनुष्ठानम्। चिकित्सालये प्रसूतानां बालानां कुतो जातकर्मादीनां कल्प। परम्पराणां विस्मरणात् पाश्चात्यप्रभावादपि विलुप्ता बहवः संस्कारः।

जीवने संस्काराः समाधिकं महत्वमादधते। ते मानवस्य शारीरिकीं मानसिकीं चोभयाविधां स्थितिं द्योतयन्ति संस्कृतो माजनो योग्याम् उचिताच्च प्रतिष्ठमश्नुते। नैते प्रारम्भिका विचाराः धार्मिकाः क्रियाकलापाः तदनुगामिनो बहवो नियमाः आचार्यं पद्धतिश्चेति सर्वमिदं संस्कारेषु समाविष्टं वर्तते। इमे समेऽपि संस्कारा अनौपचारिकां शरीरसंस्कारमेव नोद्दिशन्ति, अपितु संस्कारो संजनस्य समग्रं व्यक्तित्वं परिष्कृतं शोधयन्ति पूर्णताञ्च प्रापयन्ति। संस्कारैः अन्तःकरणं शुद्धयति। ते मानवं पापाद् अज्ञानाच्च निर्वाय आचार विचाराभ्यां ज्ञानविज्ञानाभ्यां च संयोजयन्ति। संस्कारैः वस्तुन उत प्राणिनोऽधिकं संस्करणम्, परिमार्जनम्, उपादेयकारणमैव प्राधान्येन उद्दिश्यते। अर्थात् परिमार्णनम्, उपादेयकाणमैव प्राद्यान्येन उद्धिश्यते। अर्थात् संस्काराः पात्रता समुद्भावयन्ति। सभ्यतायाः संस्कृत्याः, प्रज्ञायाश्च विकासेन सहैव अस्माकं मनीषिणो मानवजीवनम् अधिकाधिक क्षमता सम्पन्नसंवेदनशीलं, भावप्रवणम्, उपयोगि च विधातुमेव संस्काराणात् अनिवार्यतां स्वीचक्रुः।

जीवने संस्काराणां तावन्महत्वं यद् महर्षिः आश्वलायनः संस्कारहीनस्य जन्मैव निरर्थकं मनुते–

संस्कार रहिता ये तु तेषां जन्म निरर्थकम्।

वस्तुतो जीवनं सार्थकं सोदेश्यञ्च कर्तुं संस्कारः आवश्यक इत्यत्र नास्ति सदेहलेशावसरः।

सुविदितमेतत् यत् परमेश्वरेण सृष्टया समग्रसृष्टयां मानवः सर्वश्रेष्ठोमन्यते, यतो हि, स विवेकशक्त्या सम्पन्नाम् आत्मानं विकासयितुं समर्थः मानवः पुण्यकर्माण्यनुष्ठाय मोक्षलाभं कर्तुं शक्नोति। अन्यासु समस्तयोनिषु तु प्राणिनां कर्मक्षय एवजायते। किन्तु, मानवयोनौ एतेषामुपार्जनं सम्भवति। अत एवास्माकं महर्षयो मनुष्ययोनिं सर्वोत्तमां निरूपितवन्तः।

''कदापिल्लक्षते जन्म मनुष्य पुण्यभाजनम्।।''

मानवजीवनेऽस्य परमं लक्ष्यमात्मनः परमात्मरूपे प्रतिष्ठापनमास्ति। तत्तु विधिपूर्वक संस्कारसाधनैः दिव्ये ज्ञानमुत्पाद्यैव कर्तुं शक्यते। वस्तुतः मानवजीवनस्य सार्थकता अपि एतादृशे प्रतिष्ठापन एव वर्तते। वेदां, पुराणानि, धर्मशास्त्रम्, प्रतिपदं, संस्कारणामावश्यकतां प्रतिपादयन्ति। उक्तमस्ति–''आचारहीनं न पुनन्तिवेदाः।'' अर्थात् आचारहीनो मनुजो न पावित्रो भवति, न च पवित्रमाचरति।

संस्कारशब्दः सम् पूर्वकात् कृ धातोः घञ् प्रत्यये कृते संस्कारशब्दो निष्पद्यते। अस्य शब्दस्य प्रयोगः शास्त्रकारैः विविद्येस्वर्थेषु कृतो विद्यते–

मीमांसकाः ''प्रोक्षणादिजन्यसंस्कारो यज्ञाङपुरोडाष्वि द्रव्यधर्मः।[1] अर्थात् यज्ञाङ्गभूतस्य पुरोडाशादिकस्य विधिपूर्वकं शुद्धिर्नाम संस्कारः।

अद्वैतवेदान्तिनः –''स्नानाचमनादिजन्याः संस्कारा देहे उत्पद्यमानानि तदभिधानानि जीवे कल्पन्ते''[2] अर्थात् जीवोपरि शारीरिकक्रियाणां मिथ्यारोप एव संस्कारः।

साहित्यिका–साहित्यिकाः संस्कारशब्देन शिक्षां, संस्कृति, प्रशिक्षणादिकं चाभिप्रमन्ति। साहित्यशास्त्रे संस्कारशब्देन भवित्वबीजभूतः संस्कारविशेषो वासनाविशेषो ? धर्मशास्त्रे संस्कारशब्दस्याशयो धार्मिकविधि–विधानैः शुद्धि क्रियाभिश्च वर्तते। मनुः वदति–

''वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पवनः प्रत्य चेहे च।।''[3]

अनेन पद्येन स्पष्टीभवति यत् धर्मशास्त्रे संस्काराः धार्मिकमाधारम् अवलम्ब्य विधीयमानैरत्तैः अनुष्ठानैः सम्बद्धाः सन्ति, यानि मानवस्य दैहिकविकासाय, बौद्धिक विकासाय, आत्मिकाविकासाय, शुद्धये च गर्भाधानादारभ्य मृत्युपर्यन्तम् उचिते समयान्तराले संपाद्यन्ते। वस्तुतः मान्यतैषाऽऽसीत् यत् विधिपूर्वकं संस्काराणामनुष्ठानेन मनुष्यः संस्कृतो भवति, तस्मिंश्च विलक्षण अवर्णनीयाश्च गुणाः प्रादुर्भवति।

मानवे पूर्वजन्मनः कर्मणां संस्कारास्तु तिष्ठन्त्येव। गर्भस्य, मातापित्रः, अनुवांशिकतायाः संस्कारा अपि तिष्ठति। तेषु केचन संस्काराः शुभाः केचनाशुभाश्चापि भवन्ति। अशुभसंस्कारा विकास इत्यभिधीयन्ते। विकारा मानवेषु जाडयमुत्पादयन्ति, किन्तु संस्काराः जीवेषु लिप्तान् विकारान् प्रशमयन्ति, तेषु च किमपि वैशिष्ट्यं जनयति। अस्मिन्नर्थे संस्कारैः परिष्करणं, परिमार्जनं चापेक्षितो वर्तते। स्वर्णिभ्यो निष्कासितं रत्नं, स्वर्णादिक वा मृदायुक्तम् अघटितं च भवति। तस्मिन् प्रकाशं सौन्दर्यं चाभिवर्धायितुं तद्रत्नं ताप्यते, सुष्ठु घक्षते, कर्त्तव्यते, दीप्यते, ग्रन्थानां छिद्राभावोऽपि छिद्रीकृत्य पूर्यते रत्नम्। अतः मानवेऽपि मानवीयभक्तेः सौन्दर्यस्य चाघानाय तेन सुसंस्कृतेन भवितव्यम् जीवस्य संस्कारा अप्येवं भूता एव सन्ति, बीजमतानां गर्भगतानां च दोषाणामपनयनम् जीवने चैतन्यमाधाय पुरुषार्थ प्राप्तेः योग्यताया उत्पादनं च संस्काराणां प्रमुखं प्रयोजनं वर्तते। मनुः वदति–

''गा श्रे र्हौमै जात कर्म–चौड–मौञ्जीनिबन्धनैः।
वैजिकं गार्मिकं चैनो द्विजनानपभृज्यते।।''[4]

एतदेव शास्त्रेषु मलापनयनम्, गुणाधानम्, डीनाङ्गपूर्तिश्च अभिधीयते। वयं पश्यायो यन्मनुष्यस्य मनोवृत्तयस्तस्य आहारानुगुणं, व्यवहारनुगुणं च परिवर्तनं यान्ति। अर्थात् यादृशः कस्यचिदाहारः सात्विको राजसास्तामसो वा, सादृश्यमेव तस्य मनोवृत्तिरपि भवति। मानवीयो व्यवहारोऽपि तस्य मानसिकवृत्तिं परिवर्तयति। तथैव संस्कारानुगुणमपि मनुष्यस्य मनोवृत्यः परिवर्तनं प्राप्नुवन्ति। पृथिव्या मृदा यथा उर्वरकादि संस्कारैः उत्तरोत्तरं परिवर्ध्यते तथा सा उत्तमफलप्रदेति दरीदृश्यन्ते लोके। वयमपि तद्वदेव स्मः। अस्माकं देहोऽपि पञ्चभूतैः निर्मितो वर्तते। मूलमन्त्रान्विते स्थानेऽवस्थाय वयं जन्मगृहीतवन्तः गर्भस्थं शिशुं तु प्रकृतिः स्वयं तेभ्यो नूनं रक्षति। सा जरायुरूपेण वेष्टनेन तान् वेशयति। अतएव मानवः जरायुजाः इत्यभिधीयन्ते। गर्भाहं बहिरागतं सति बाह्यदोषेभ्यस्त्रातुं विविधसंस्कारैः संस्कृतो मानवः स्वीयाम् अभीष्टामुन्नतिं करोति। साम्प्रतिके युगे संस्काराणामाश्रयत्वात् अस्मदीयैतादृशी मनोवृत्तिः परिणता वर्तते।

मानव इच्छति यत्तस्य विकासोऽभिवृद्धिश्च निर्विघ्नं संपद्येत। संस्काराणां प्रधानभूतमुद्देश्यं वर्तते अमाङ्गलिक प्रभावाणां निराकरणाम् माङ्गलिकप्रभावाणां चावाप्तिः। स्त्रिया गर्भकाले प्रसवकाले शैशवावस्थायाम् अथ च गर्भिणीमाभिरक्षितुम् एवं विधाः प्रार्थनाः विद्यीयन्ते। भूतैनाक्रान्ते शिशौ पिता प्रार्थयति।' ''अथास्यै दक्षिणस्तनं प्रक्षाल्य प्रमच्छतीम् स्तनमिति'' पारस्करगृह्यसूत्रस्य भाष्यकारः आचार्यो गदाधरः प्रतिपादयति–

'ततस्तुष्ट तुष्ट एनं एनं कुमारं मुञ्चय।'[5]

मुण्डनावसरे लूनाः केशा गोमयपिण्डे समिश्रीकृत्यगोष्ठे उतवा नद्यां प्रक्षिप्यते। अस्याः प्रक्रिया या उद्देश्यमिदमेव यन्न कोऽपि भूतः पिशाचो

वा तेष्वन्नभीष्टः प्रयोगं कर्तुमर्हैत्। अमङ्गलकारीणां शक्तीनां निराकरणाय एतासाम् अशुभशक्तीनां समक्षमेव प्रार्थनाय सह मानवो देवानां समक्षमपि एतासाम् अमङ्गलाशक्तीनां, निराकरणाय प्रार्थयति। चतुर्थीकर्मावसरे नवोढाम् अमङ्गलाद् रक्षितुं पतिः देवानाह्वयति–
''अग्ने प्रायश्चिते त्वं देवानां प्रायश्चितिरसि ब्राह्मणस्त्वा नाथ काम, उपद्यावानि याऽस्यै पतिध्नी नानूस्तामस्यै नाशय स्वाहा।''[6]

**निष्कर्षः –**

एवञ्च संस्कृतवाङ्मये वेदे, पुराणे, धर्मशास्त्रे, कोषे, काव्यशास्त्रे च प्रतिपादिताः संस्कारशब्दार्थाः प्रकाश्यात्र लोके संस्कारस्य प्रमुक्तार्थोऽपि प्रकाशितः विद्यते।

**सन्दर्भाः –**


1. वाचस्पत्यम् वृहदभिद्यानम्, पृ. 5188।
2. तत्रैव।
3. मनुस्मृतिः–2/26।
4. मनुस्मृतिः–2/27।
5. पा0 मृ0 ग0 आ–1/16/20।
6. पा0 गृ0–1/11।